श्री प्रत्यंगिरा सर्वार्थसाधक कवचं

श्री प्रत्यंगिरा सर्वार्थसाधक कवचं

देव्युवाच ।
भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ।
देव्याः प्रत्यंगिरायाश्च कवचं यत्प्रकाशितं ॥1॥

सर्वार्थसाधनं नाम कथयस्व मयि प्रभो ।
भैरव उवाच ।
शृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतं ॥2॥

सर्वार्थसाधनं नाम त्रैलोक्ये चाऽतिदुर्लभं ।
सर्वसिद्धिमयं देवि सर्वैश्वर्यप्रदायकं ॥3॥

पठनाच्छ्रवणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ।
सर्वार्थसाधकस्याऽस्य कवचस्य ऋषिः शिवः ॥4॥

छंदो विराट् पराशक्तिर्जगद्धात्री च देवता ।
धर्माऽर्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥5॥

न्यासः –
श्रीसर्वार्थसाधककवचस्य शिव ऋषये नमः शिरसि ।
विराट् छंदसे नमः मुखे ।
श्रीमत्प्रत्यंगिरा देवतायै नमः हृदये ।
ऐं बीजाय नमः गुह्ये ।
ह्रीं शक्तये नमः पादौ ।
श्रीं कीलकाय नमः नाभौ ।
धर्मार्थकाममोक्षेषु विनियोगाय नमः सर्वांगे॥

कवचं –
प्रणवं मे शिरः पातु वाग्भवं च ललाटकं ।
ह्रीं पातु दक्षनेत्रं मे लक्ष्मीर्वाम सुरेश्वरी ॥6॥

प्रत्यंगिरा दक्षकर्णं वामे कामेश्वरी तथा ।
लक्ष्मीः प्राणं सदा पातु वदनं पातु केशवः ॥7॥

गौरी तु रसनां पातु कंठं पातु महेश्वरः ।
स्कंधदेशं रतिः पातु भुजौ तु मकरध्वजः ॥8॥

शंखनिधिः करौ पातु वक्षः पद्मनिधिस्तथा ।
ब्राह्मी मध्यं सदा पातु नाभिं पातु महेश्वरी ॥9॥

कौमारी पृष्ठदेशं तु गुह्यं रक्षतु वैष्णवी ।
वाराही च कटिं पातु चैंद्री पातु पदद्वयं ॥10॥

भार्यां रक्षतु चामुंडा लक्ष्मी रक्षतु पुत्रकान् ।
इंद्रः पूर्वे सदा पातु आग्नेय्यामग्निदेवता ॥11॥

याम्ये यमः सदा पातु नैर्ऋत्यां निर्ऋतिस्तथा ।
पश्चिमे वरुणः पातु वायव्यां वायुदेवता ॥12॥

सौम्यां सोमः सदा पातु चैशान्यामीश्वरो विभुः ।
ऊर्ध्वं प्रजापतिः पातु ह्यधश्चाऽनंतदेवता ॥13॥

राजद्वारे श्मशाने तु अरण्ये प्रांतरे तथा ।
जले स्थले चाऽंतरिक्षे शत्रूणां निवहे तथा ॥14॥

एताभिः सहिता देवी चतुर्बीजा महेश्वरी ।
प्रत्यंगिरा महाशक्तिः सर्वत्र मां सदाऽवतु ॥15॥

फलश्रुतिः –
इति ते कथितं देवि सारात्सारं परात्परं ।
सर्वार्थसाधनं नाम कवचं परमाद्भुतं ॥16॥

अस्याऽपि पठनात्सद्यः कुबेरोऽपि धनेश्वरः ।
इंद्राद्याः सकला देवाः धारणात्पठनाद्यतः ॥17॥

सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः ।
पुष्पांजल्यष्टकं दत्त्वा मूलेनैव सकृत्पठेत् ॥18॥

संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ।
प्रीतिमन्येऽन्यतः कृत्वा कमला निश्चला गृहे ॥19॥

वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ।
यो धारयति पुण्यात्मा सर्वार्थसाधनाभिधं ॥20॥

कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः ।
सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥21॥

पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ।
बहुपुत्रवती भूयाद्वंध्याऽपि लभते सुतं ॥22॥

ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तत्तनुं ।
एतत्कवचमज्ञात्वा यो जपेत्परमेश्वरीं ।
दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ॥23॥

इति श्रीरुद्रयामलतंत्रे पंचांगखंडे सर्वार्थसाधनं नाम श्री प्रत्यंगिरा कवचं ।